


# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
1

भक्तामर-प्रणत-मौलिमणि-प्रभाणा-
मुद्योतकं दलित-पाप-तमोवितानम् ।
सम्यक् प्रणम्य जिनपादयुगं युगादा-
वालम्बनं भवजले पततां जनानाम् ॥ १ ॥




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp
## 2

यः संस्तुतः सकल-वाङ्मय तत्त्वबोधा-

दुद्भूतबुद्धिपटुभि सुरलोक-नाथैः ।

स्तोत्रैर् जगत्त्रितय चित्तहरैरुदारैः

स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२ ॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
3

बुद्ध्या विनाऽपि विबुधार्चितपादपीठ !
स्तोतुं समुद्यत-मतिर् विगत-त्रपोऽहम् ।
बालं विहाय जलसंस्थितमिन्दुबिम्ब-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥ ३ ॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


वक्तुं गुणान् गुणसमुद्र ! शशांककान्तान्,

कस्ते क्षमः सुरगुरुप्रतिमोऽपि बुद्ध्या ।

कल्पान्त-काल-पवनोद्धत-नक्रचक्रं,

को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥४॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


सोऽहं तथापि तव भक्तिवशान्मुनीश !
कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः ।
प्रीत्याऽऽत्मवीर्यमविचार्य मृगी मृगेन्द्रं,
नाभ्येति किं निजशिशोः परिपालनार्थम् ।।५।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
6

अल्पश्रुतं श्रुतवतां परिहासधाम,
त्वद्भक्तिरेव मुखरीकुरुते बलान्माम् ।
यत्कोकिलः किल मधौ मधुरं विरौति,
तच्चाम्र-चारु-कलिकानिकरैकहेतुः ॥६॥




# Jain Vishwa Bharati

## 14th Annual Spiritual Camp



त्वत्संस्तवेन भवसन्तति-सन्निबद्धं
पापं क्षणात्क्षयमुपैति शरीरभाजाम् ।
आक्रान्त-लोकमलिनीलमशेषमाशु
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥७॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**8**

मत्वेति नाथ ! तव संस्तवनं मयेद-
मारभ्यते तनुधियापि तव प्रभावात् ।
चेतो हरिष्यति सतां नलिनीदलेषु
मुक्ताफल-द्युतिमुपैति ननूदबिन्दुः ॥८॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
9

आस्तां तव स्तवनमस्तसमस्त-दोषं
त्वत्संकथापि जगतां दुरितानि हन्ति ।
दूरे सहस्रकिरणः कुरुते प्रभैव
पद्माकरेषु जलजानि विकाशभाञ्जि ।।९।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 10

नात्यद्भुतं भुवनभूषण ! भूतनाथ !
भूतैर् गुणैर् भुवि भवन्तमभिष्टुवन्तः ।
तुल्या भवन्ति भवतो ननु तेन किं वा
भूत्याश्रितं य इह नात्मसमं करोति ॥१०॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
11

दृष्ट्वा भवन्तमनिमेषविलोकनीयं
नान्यत्र तोषमुपयाति जनस्य चक्षुः ।
पीत्वा पयः शशिकरद्युति-दुग्धसिन्धोः
क्षारं जलं जलनिधेरसितुं क इच्छेत् ॥११॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


यैः शान्तरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैक-ललामभूत !
तावन्त एव खलु तेऽप्यणवः पृथिव्यां,
यत्ते समानमपरं न हि रूपमस्ति ॥१२॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
13

वक्त्रं क्व ते सुर-नरोरग-नेत्रहारि
नि:शेष-निर्जित-जगत्-त्रितयोपमानम् ।
बिम्बं कलंक-मलिनं क्व निशाकरस्य
यद् वासरे भवति पाण्डु पलाशकल्पम् ॥१३॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**14**

सम्पूर्णमण्डल-शशांककला-कलाप-
शुभ्रा गुणास्त्रिभुवनं तव लंघयन्ति ।
ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं
कस्तान् निवारयति संचरतो यथेष्टम् ॥१४॥




# Jain Vishwa Bharati
## $14^{th}$ Annual Spiritual Camp



चित्रं किमत्र यदि ते त्रिदशांगनाभिर्
नीतं मनागपि मनो न विकार-मार्गम् ।
कल्पान्तकाल-मरुता चलिताचलेन,
किं मन्दराद्रिशिखरं चलितं कदाचित् ? ।।१५।।




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp
## 16

निर्धूमवर्तिरपवर्जित-तैलपूरः

कृत्स्नं जगत् त्रयमिदं प्रकटीकरोषि ।

गम्यो न जातु मरुतां चलिताचलानां

दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६ ॥




**Jain Vishwa Bharati**

**14th Annual Spiritual Camp**

**17**

नास्तं कदाचिदुपयासि न राहुगम्यः

स्पष्टीकरोषि सहसा युगपज्जगन्ति ।

नाम्भोधरोदर-निरुद्धमहाप्रभावः

सूर्यातिशायिमहिमासि मुनीन्द्र ! लोके ॥१७॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
18

नित्योदयं दलितमोहमहान्धकारं
गम्यं न राहुवदनस्य न वारिदानाम् ।
विभ्राजते तव मुखाब्जमनल्पकान्ति
विद्योतयज्जगदपूर्व शशांकबिम्बम् ।।१८।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


किं शर्वरीषु शशिनाऽह्नि विवस्वता वा ?

युष्मन्मुखेन्दु-दलितेषु तमस्सु नाथ !

निष्पन्न शालि-वनशालिनि जीवलोके

कार्यं कियज्जलधरैर् जलभार-नम्रैः ॥१९॥




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp



ज्ञानं यथा त्वयि विभाति कृतावकाशं
नैवं तथा हरिहरादिषु नायकेषु ।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं
नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**21**

मन्ये वरं हरिहरादय एव दृष्टा
दृष्टेषु येषु हृदयं त्वयि तोषमेति ।
किं वीक्षितेन भवता भुवि येन नान्य:
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥२१॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp

22

स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्
नान्या सुतं त्वदुपमं जननी प्रसूता ।
सर्वा दिशो दधति भानि सहस्ररश्मिं,
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥ २२ ॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**23**

त्वामामनन्ति मुनयः परमं पुमांस-
मादित्यवर्णममलं तमसः पुरस्तात् ।
त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं
नान्यः शिवः शिवपदस्य मुनीन्द्र! पन्थाः ॥२३॥




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp



त्वामव्ययं विभुमचिन्त्यमसंख्यमाद्यं
ब्रह्माणमीश्वरमनन्तमनंगकेतुम् ।
योगीश्वरं विदितयोगमनेकमेकं,
ज्ञानस्वरूपममलं प्रवदन्ति सन्त: ॥२४॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 25

बुद्धस्त्वमेव विबुधार्चित ! बुद्धि-बोधात्
त्वं शंकरोऽसि भुवनत्रय-शंकरत्वात् ।
धाताऽसि धीर ! शिवमार्गविधेर् विधानात्
व्यक्तं त्वमेव भगवन् पुरुषोत्तमोऽसि ॥२५॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 26

तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !

तुभ्यं नमः क्षितितलामलभूषणाय ।

तुभ्यं नमस्त्रिजगतः परमेश्वराय

तुभ्यं नमो जिन ! भवोदधि-शोषणाय ! ॥२६॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
27

को विस्मयोऽत्र यदि नाम गुणैरशेषैः-
त्वं संश्रितो निरवकाशतया मुनीश !
दोषैरुपात्त–विविधाश्रय-जातगर्वैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥२७॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 28

उच्चैरशोकतरु-संश्रितमुन्मयूख-
माभाति रूपममलं भवतो नितान्तम् ।
स्पष्टोल्लसत् किरणमस्ततमोवितानं,
बिम्बं रवेरिव पयोधर-पार्श्ववर्ति ॥२८॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


सिंहासने मणिमयूख-शिखाविचित्रे
विभ्राजते तव वपुः कनकावदातम् ।
बिम्बं वियद् विलसदंशुलता-वितानं
तुङ्गोदयाद्रि-शिरसीव सहस्ररश्मेः ॥२९॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


कुन्दावदात-चलचामर-चारुशोभं
विभ्राजते तव वपुः कलधौतकान्तम् ।
उद्यच्छशांक-शुचि निर्झर-वारिधार-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥३०॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp


छत्रत्रयं तव विभाति शशांककान्त-
मुच्चैः स्थितं स्थगितभानुकर-प्रतापम् ।
मुक्ताफल-प्रकरजाल-विवृद्धशोभं,
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ।। ३१ ।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 36

उन्निद्रहेम-नवपंकज-पुञ्जकान्ति,
पर्युल्लसन्नख मयूखशिखाभिरामौ ।
पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३६ ॥




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp
## 37

इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !

धर्मोपदेशनविधौ न तथा परस्य ।

यादृक् प्रभा दिनकृतः प्रहतान्धकारा

तादृक् कुतो ग्रह-गणस्य विकाशिनोऽपि ।। ३७ ।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**38**

श्च्योतन् मदाविल-विलोल-कपोलमूल-
मत्तभ्रमद्-भ्रमरनाद-विवृद्धकोपम् ।
ऐरावताभमिभमुद्धतमापतन्तं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३८ ॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**39**

भिन्नेभ-कुम्भगलदुज्ज्वल-शोणिताक्त-
मुक्ताफल प्रकर-भूषित-भूमिभागः ।
बद्धक्रमः क्रमगतं हरिणाधिपोऽपि
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३९ ॥




# Jain Vishwa Bharati

## 14th Annual Spiritual Camp

**40**

कल्पान्तकाल-पवनोद्धत-वह्नि-कल्पं
दावानलं ज्वलितमुज्ज्वलमुत्स्फुलिङ्गम् ।
विश्वं जिघत्सुमिव सम्मुखमापतन्तं
त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥४०॥




# Jain Vishwa Bharati
## $14^{th}$ Annual Spiritual Camp
### 41

रक्तेक्षणं समदकोकिल- कण्ठनीलं
क्रोधोद्धतं फणिनमुत्फणमापतन्तम् ।
आक्रामति क्रमयुगेन निरस्तशंकः
त्वन्नामनागदमनी हृदि यस्य पुंसः ।।४१ ।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 42

वल्गत्तुरंग-गजगर्जित-भीमनाद-
माजौ बलं बलवतामपि भूपतीनाम् ।
उद्यद्दिवाकरमयूख-शिखापविद्धं
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥४२॥




# Jain Vishwa Bharati
# 14th Annual Spiritual Camp
## 43

कुन्ताग्रभिन्न गज-शोणितवारिवाह-
वेगावतार-तरणातुरयोध-भीमे ।
युद्धे जयं विजितदुर्जयजेयपक्षाः-
त्वत्पाद-पंकजवनाश्रयिणो लभन्ते ।।४३ ।।




# Jain Vishwa Bharati

## $14^{th}$ Annual Spiritual Camp

44

अम्भोनिधौ क्षुभितभीषण-नक्रचक्र-

पाठीन-पीठभयदोल्वणवाडवाग्नौ ।

रंगत्तरंग-शिखरस्थित-यानपात्रा:-

त्रासं विहाय भवत: स्मरणाद् व्रजन्ति ।।४४ ।।




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**45**

उद्भूतभीषणजलोदर-भारभुग्नाः

शोच्यां दशामुपगताश्च्युतजीविताशाः ।

त्वत्पाद-पंकजरजोऽमृतदिग्धदेहा

मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥४५॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 46

आपाद-कण्ठमुरुश्रृङ्खल-वेष्टिताङ्गा
गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः ।
त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः
सद्यः स्वयं विगतबन्धभया भवन्ति ॥४६॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
**47**

मत्तद्विपेन्द्र-मृगराज-दवानलाहि-
संग्राम-वारिधि-महोदर-बन्धनोत्थम् ।
तस्याशु नाशमुपयाति भयं भियेव
यस्तावकं स्तवमिमं मतिमानधीते ॥४७॥




# Jain Vishwa Bharati
## 14th Annual Spiritual Camp
### 48

स्तोत्रस्रजं तव जिनेन्द्र ! गुणैर्निबद्धां,
भक्त्या मया रुचिरवर्णविचित्रपुष्पाम् ।
धत्ते जनो य इह कण्ठगतामजस्रं
तं मानतुंगमवशा समुपैति लक्ष्मीः ।।४८ ।।